श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री श्रीनिवासाचार्यसूरिणा विरचितम्

# ॥ श्री मयूरपुर वेङ्कटेशमङ्गलम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मयूरपुर वेङ्कटेशमङ्गलम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

मङ्गलं श्रीनिवासाय मयूरपुरवासिने।
निरञ्जनाय नित्याय नित्यकल्याणदायिने॥ **1** ॥

मात्रे कमलहस्तायै सर्वलोकहितैषिणे।
पद्मनाभहृदम्भोज वासिन्यै नित्यमङ्गलम्॥ **2** ॥

स्वभुक्त मालयाऽऽकृष्टमधुसूदनचेतसे।
विष्णुचित्ततनूजायै गोदायै नित्यमङ्गलम्॥ **3** ॥

ज्ञानशक्तिबलैश्वर्यवीर्यतेजःस्वरूपिणे।
सुलभाय सुशीलाय श्रीनिवासाय मङ्गलम्॥ **4** ॥

स्वामिपुष्करिणीतीरे वराहस्वामिसन्निधौ।
श्रीभूमिभ्यां समेताय श्रीनिवासाय मङ्गलम्॥ **5** ॥

मनोवाक्कायसञ्जात व्याधिपीडितदेहिनाम्।
निरुपाधिकवैद्याय श्रीनिवासाय मङ्गलम्॥ **6** ॥

श्रीबिल्वार्चनतुष्टाय कस्तूरीपुण्ड्रधारिणे।
सूर्यकोटिप्रकाशाय श्रीनिवासाय मङ्गलम्॥ **7** ॥

शिष्टावनधुरीणाय दुष्टासुरविघातिने।
तुष्टामरगणायास्तु श्रीनिवासाय मङ्गलम्॥ **8** ॥

संसारि मुक्तसेवार्थं शेषाद्रिशिखरे सदा।
सुप्रतिष्ठितदेवाय श्रीनिवासाय मङ्गलम्॥ **9** ॥

सादरं सकलैर्दत्तवरपुष्पफलादिभिः।
सन्तुष्टाय सुरक्ताय श्रीनिवासाय मङ्गलम्॥ **10** ॥

स्वघण्टाया अंशभूतनिगमान्तार्यसूरिणा।
सदा संसेव्यमानाय श्रीनिवासाय मङ्गलम्॥ **11** ॥

मद्रपुर्याख्यनगरे मयूरपुरवासिनाम्।
रक्षणायावतीर्णाय श्रीनिवासाय मङ्गलम्॥ **12** ॥

मधुकैटभसंहर्त्रे विद्यानामधिपाय च।
अङ्के लक्ष्मीविशिष्टाय हयवक्त्राय मङ्गलम्॥ **13** ॥

शरणागतसन्त्राणदीक्षिताय महात्मने।
श्रीमते रणधीराय रघुवर्याय मङ्गलम्॥ **14** ॥

हिरण्यकशिपुप्राणहारिणे भवनाशिने।
सर्वत्र परिपूर्णाय श्रीनृसिंहाय मङ्गलम्॥ **15** ॥

शत्रुशोणिततुष्टाय रक्तनेत्रयुताय च।
प्रत्यालीढस्थपादाय हेतिराजाय मङ्गलम्॥ **16** ॥

विश्वामित्रकुलोद्भूततोतानन्तार्यसूनवे।
श्रीमते गुरुवर्याय वेङ्कटेशाय मङ्कलम्॥ **17** ॥

श्रियःकान्ताय कल्याणनिधये निधयेऽर्थिनाम्।
मयूरपुरवासाय नित्यश्रीर्नित्यमङ्गलम्॥ **18** ॥

॥ इति श्री मयूरपुर वेङ्कटेशमङ्गलं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥